॥ॐ॥ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धार-
यिता भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम्॥
नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधी-
भ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते
करोमि ॥ ॐ शान्तिः ॥

काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गदात्रे च यज्ञेशाय नमो नमः॥

अग्निर्ऋषिः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्॥
एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे
अन्तः। स विजायमानः स जनिष्यमाणः प्रत्यङ्मु-
खास्तिष्ठति विश्वतोमुखः॥ अग्नावग्निश्चरति प्रविष्ट

ऋषीणां पुत्रो अधिराज एषः। स्वाहाकृत्य ब्रह्मणा ते
जुहोमि मा देवानां मिथुयाकर्भागधेयम् ॥

शृणोत्वग्निः समिधाहवं मे शृण्वन्त्वापो धिषणाश्च
देवीः। शृणोत ग्रावाणो विदुषो नु यज्ञꣳ शृणोतु देवः
सविता हवं मे ॥ अग्निनेन्द्रेण सोमेन सरस्वत्या वि-
ष्णुना देवताभिः। याज्यानुवाक्याभ्यामुप ते हुवे सवाहं
यज्ञमाददे ते वषट्कृतम् ॥ स्तुतꣳ शस्त्रं प्रातिगरं
ग्रहमिडामाशिष आ वृञ्जे सुवः। पत्नीसंयाजानु-
प ते हुवे सवाहꣳ समिष्टयजुराददे तव ॥

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः।
द्युम्नैर्वाजेभिरागतम् ॥ अग्न आयाहि वीतये

अग्ने तेजस्विन् तेजस्वी त्वं देवेषु भूयाः तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्

मनुष्येषु कुरु

अग्ने नय सुपथा राये अस्मान् विश्वानि देव
वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम॥ अग्निमीडे पुरो-
हितं यज्ञस्य देवमृत्विजम्। होतारꣳ रत्नधातमम्॥
अग्निना रयिमश्नवत्पोषमेव दिवे दिवे। यशसं वीरवत्तमम्॥
अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः स-
मिन्धते। विश्वस्यां विशि प्रविविशिवाꣳसमीमहे स नो
मुञ्चत्वꣳहसः। यस्येदं प्राणन्निमिषद्यदेजति यस्य
जातं जनमानं च केवलम्। स्तौम्यग्निं नाथितो जोह-
वीमि स नो मुञ्चत्वꣳहसः॥ अग्निमग्निꣳ हवीमभिः सदा
हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम्। तꣳहि शश्वन्त ई-
डते स्रुचा देवं घृतश्चुता। अग्निꣳ हव्याय वोढवे॥

अग्निर्मा दुरिष्टात्पातु ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासम्।
अस्मास्विन्द्र इन्द्रियं दधातु।अस्मान् राय उत यज्ञाः सचन्ताम्॥
उदेनमुत्तरां नयाग्ने घृतेनाहुत। रायस्पोषेण सꣳसृज॥

अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे। गर्भे सञ्जा-
यसे पुनः। वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः।
वृषा धर्माणि दधिषे॥

त्वामग्ने मानुषीरीडते विशो होत्राविदं विविचिꣳ रत्न-
धातमम्। गुहा सन्तꣳ सुभग विश्वदर्शतं तुविष्मणसꣳ
सुयजं घृतश्रियम्॥ मूर्धानं दिवो अरतिं पृथिव्या वैश्वा-
नरमृताय जातमग्निम्। कविꣳ सम्राजमतिथिं जना-
नामासन्ना पात्रं जनयन्त देवाः॥

आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु
प्रवोढुम् । अग्निर्विद्वान्त्स यजात्सेदु होता सो अध्वरान्
स ऋतून् कल्पयाति । यद्वाहिष्ठं तदग्नये बृहदर्च
विभावसो । महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥
अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि
विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तन-
याय शं योः । त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ।
त्वं यज्ञेष्वीड्यः । यद्वो वयं प्रमिनाम व्रतानि विदुषां
देवा अविदुष्टरासः । अग्निष्टद्विश्वमा पृणाति विद्वान्
येभिर्देवाꣳ ऋतुभिः कल्पयाति ॥
इमो अग्ने वीततमानि हव्याऽजस्रो वक्षि देवताति-
मच्छ । प्रति न ईꣳ सुरभीणि वियन्तु । क्रीडं वः शर्धो

मारुतमनर्वाणꣳ रथे शुभम्। कण्वा अभि प्रगायत ॥

अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत्। स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः। अग्निर्धिया समृण्वति। द्यावा नः पृथिवी इमꣳ सिध्रमद्य दिविस्पृशम्। यज्ञं देवेषु यच्छताम् ॥

अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व। अस्मे दीदिहि सुमना अहेडन् तव स्याꣳ शर्मन् त्रिवरूथ उद्भित्। सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व। अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्र णुदा नः सपत्नान् ॥

युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः। इन्धानास्त्वा ...

लिहृतो वयं ते। यन्मे अग्ने अस्य यज्ञस्य रिष्याद्यद्वा स्कन्दादाज्यस्योत विष्णो। तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे ॥

उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि। राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानꣳ स्वे दमे। स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये। अग्ने त्वं नो अन्तमः। उत त्राता शिवो भव वरूथ्यः। तं त्वा शोचिष्ठ दीदिवः। सुम्नाय नूनमीमहे सखिभ्यः। वसुरग्निर्वसुश्रवाः। अच्छा नक्षि द्युमत्तमो रयिं दाः। ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यतेडाः स्थ मधुकृतः स्योना माऽऽवि-

शतेरा मदः। सहस्रपोषं वः पुष्यासं मयि वो रायः श्रय-
न्ताम्। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो
यो नः प्रचोदयात्। सोमानꣳ स्वरणं कृणुहि ब्रह्मण-
स्पते। कक्षीवन्तं य औशिजम्। परि त्वाग्ने पुरं वयं
विप्रꣳ सहस्य धीमहि। धृषद्वर्णं दिवे दिवे भेत्तारं भ-
ङ्गुरावतः। अग्ने गृहपते सुगृहपतिरहं त्वया गृह-
पतिना भूयासꣳ सुगृहपतिर्मया त्वं गृहपतिना भू-
याः शतꣳ हिमास्तामाशिषमाशासे तन्तवे ज्योतिष्म-
तीं तामाशिषमाशासेऽमुष्मै ज्योतिष्मतीम्॥

मम नाम प्रथमं जातवेदः पिता माता च दधतु-
र्यदग्रे। तत्त्वं बिभृहि पुनरा मदैतोस्तवाहं नाम
बिभराण्यग्ने। मम नाम

विवसानौ ये चराव:। आयुषे त्वं जीवसे वयं यथायथं
वि परि दधावहै पुनस्ते। नमोऽग्नयेऽप्रतिविद्धाय न-
मोऽनाधृष्टाय नमः सम्राजे। अषाढोऽग्निर्बृहद्वया वि-
श्वजित्सहन्त्यः श्रेष्ठो गन्धर्वः। त्वत्पितारो अग्ने देवास्त्वामा-
हुतयस्त्वद्विवाचनाः। सं मामायुषा सं गौपत्येन सुहिते
मा धाः। अयमग्निः श्रेष्ठतमोऽयं भगवत्तमोऽयꣳ सहस्रसा-
तमः। अस्मा अस्तु सुवीर्यम्॥ मनो ज्योतिर्जुषतामाज्यं
विच्छिन्नं यज्ञꣳ समिमं दधातु। या इष्टा उषसो निम्रु-
चश्च ताः सन्दधामि हविषा घृतेन॥ अग्ने व्रतपते व्रतं
चरिष्यामि तच्छकेयं तन्मे राध्यताम्॥ अग्निꣳ होतार-
मिह तꣳ हुवे देवान् यज्ञियानिह यान् हवामहे। आ
यन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्य॥

भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा। उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायाऽऽदधे। आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः। पितरं च प्रयन्त्सुवः। त्रिꣳशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये। प्रत्यस्य वह द्युभिः। अस्य प्राणादपानत्यन्तश्चरति रोचना। व्यख्यन्महिषः सुवः। यत्त्वा क्रुद्धः परोवप मन्युना यदवर्त्या। सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि। यत्ते मन्युपरोप्तस्य पृथिवीमनु दध्वसे। आदित्या विश्वे तद्देवा वसवश्च समाभरन्। मनो ज्योतिर्जुषता-माज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु। बृहस्पतिस्त-नुतामिमं नो विश्वे देवा इह मादयन्ताम्॥ सप्त ते अग्ने समिधः सप्त

सप्तहोत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा। पुनर्नः पाहि विश्वतः। सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्निया विश्वतस्परि। लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु केतः सकेतः सुकेतस्ते न आदित्या आज्यं जुषाणा वियन्तु विवस्वाँ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु ॥

उप प्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते। अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्रसामृषिम्। अग्निर्मूर्धा दिवः

ककुत्पतिः पृथिव्या अयम् । अपाꣳरेताꣳसि जिन्वति ।
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्व-
रेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु
चित्रं विभुवं विशे विशे । उभा वामिन्द्राग्नी आहुवध्या
उभा राधसः सह मादयध्यै । उभा दाताराविषाꣳ र-
यीणामुभा वाजस्य सातये हुवे वाम् । अयं ते योनि-
र्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आ रो-
हाथा नो वर्धया रयिम् । अग्न आयूꣳषि पवस
आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ।
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधत्पोषꣳ
रयिं मयि । अग्ने पावक रोचिषा मन्द्रया देव जिह्व-

या । आ देवान् वक्षि यक्षि च । स नः पावक दीदिवोऽ-
ग्ने देवाꣳ इहावह । उप यज्ञꣳ हविश्च नः । अग्निः शुचि-
व्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आ-
हुतः । उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । त-
व ज्योतीꣳष्यर्चयः । आयुर्दा अग्नेऽस्यायुर्मे देहि व-
र्चोदा अग्नेऽसि वर्चो मे देहि तनूपा अग्नेऽसि तनुवं
मे पाह्यग्ने यन्मे तनुवा ऊनं तन्म आ पृण चित्रावसो
स्वस्ति ते पारमशीयेन्धानास्त्वा शतꣳ हिमा द्युमन्तः
समिधीमहि वयस्वन्तो वयस्कृतं यशस्वन्तो यशस्कृ-
तꣳ सुवीरासो अदाभ्यम् । अग्ने सपत्नदम्भनं वर्षिष्ठे
अधि नाके । सं त्वमग्ने सूर्यस्य वर्चसाऽगथाः समृषी-

णाꣳ स्तुतेन सं प्रियेण धाम्ना । त्वमग्ने सूर्यवर्चा असि
सं मामायुषा वर्चसा प्रजया सृज ॥
सुवर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी । य-
ज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे । अग्ने प्रेहि
प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् । इय-
क्षमाणा भृगुभिः सजोषाः सुवर्यन्तु यजमानाः स्वस्ति ।
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समी-
ची । द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धा-
रयन् द्रविणोदाः । अग्ने सहस्राक्ष शतमूर्धञ्छतं ते
प्राणाः सहस्रमपानाः । त्वꣳ साहस्रस्य राय ईशिषे
तस्मै ते विधेम वाजाय स्वाहा । सुपर्णोऽसि गरुत्मान्

पृथिव्याᳪं सीद पृष्ठे पृथिव्याः सीद भासान्तरिक्षमा
पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृᳪंह॥
आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां योनिमासीद
साध्या। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा य-
जमानश्च सीदत। प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया
सूर्म्या यविष्ठ। त्वाᳪं शश्वन्त उप यन्ति वाजाः। विधेम
ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे। य-
स्माद्योनेरुदारिथा यजे तं प्र त्वे हवीᳪंषि जुहुरे
समिद्धे। ताᳪं सवितुर्वरेण्यस्य चित्रामाहं वृणे
सुमतिं विश्वजन्याम्। यामस्य कण्वो अदुहत्प्रपी-
नाᳪं सहस्रधारां पयसा महीं गाम्॥

समुद्रस्य त्वाऽवाकयाऽग्ने परि व्ययामसि। पा
वको अस्मभ्यꣳ शिवो भव। हिमस्य त्वा जरायुणा-
ग्ने परि व्ययामसि। पावको अस्मभ्यꣳ शिवो भव।
उप ज्मन्नुप वेतसेऽवत्तरं नदीष्वा। अग्ने पित्तम-
पामसि। मण्डूकि ताभिरागहि सेमं नो यज्ञम्। पावक
वर्णꣳ शिवं कृधि। पावक आ चितयन्त्या कृपा। क्षामन्
रुरुच उषसो न भानुना। तूर्वन्न यामन्नेतशस्य
नू रण आ यो घृणे। न ततृषाणो अजरः। अग्ने पावक
रोचिषा मन्द्रया देव जिह्वया। आ देवान् वक्षि यक्षि च।
स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽऽवह। उप यज्ञꣳ
हविश्च नः। अपामिदं न्ययनꣳ समुद्रस्य निवेशनम्।

अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳशिवो भव।
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यं ते अ-
स्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव । नृषदे
वड प्सुषदे वड्वनसदे वड्बर्हिषदे वट् सुवर्विदे वट्।
ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भाग-
मासते । अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं जुहुध्वं
मधुनो घृतस्य । ये देवा देवेष्वधि देवत्वमायन् ये
ब्रह्मणः पुर एतारो अस्य । येभ्यो नर्ते पवते किंचन
न ते दिवो न पृथिव्या अधि स्नुषु । प्राणदा अपानदा
व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः। अन्यं ते अस्मत्तप-
न्तु हेतयः पावको अस्मभ्यꣳशिवो भव। अग्निस्तिग्मेन

वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु
नक्तम् । जातो यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः प-
रिज्मा । वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः
सदा नः । त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा
जायमानः । त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर
जातवेदो महित्वा । अस्माकमग्ने मघवत्सु धारया-
नामि क्षत्रमजरँ सुवीर्यम् । वयं जयेम शतिनँ सह-
स्रिणं वैश्वानर वाजमग्ने तवोतिभिः । वैश्वानरस्य सुमतौ
स्याम राजा हि कं भुवनानामभिश्रीः । इतो जातो विश्वमि-
दं वि चष्टे वैश्वानरो यतते सूर्येण ॥